CAREERINDIA

# ಕರ್ನಾಟಕ ಶಾಲಾ ಪರೀಕ್ಷೆ ಮತ್ತು ಮೌಲ್ಯನಿರ್ಣಯ ಮಂಡಲಿ
**ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು – 560 003**

**KARNATAKA SCHOOL EXAMINATION AND ASSESSMENT BOARD**
**Malleshwaram, Bengaluru – 560 003**

## 2024-25ರ ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಮಾದರಿ ಪ್ರಶ್ನೆಪತ್ರಿಕೆ-1
## S.S.L.C. MODEL QUESTION PAPER-1 : 2024-25

## ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ
## Subject : Third Language — SANSKRIT
## तृतीयभाषा — संस्कृतम्

**ವಿಷಯ ಸಂಕೇತ : 67-S** | **Subject Code : 67-S**

ಸಮಯ : 3 ಗಂಟೆ ] | [ Time : 3 Hours

ಗರಿಷ್ಠ ಅಂಕಗಳು : 80 ] | [ Max. Marks : 80

---

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 38 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
3. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
4. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे अष्टत्रिंशत् (38) प्रश्नाः सन्ति ।
2. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
3. प्रश्नानाम् अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
4. प्रश्नपत्रमुत्तरितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

[ Turn over

www.careerindia.com

CAREERINDIA



**I. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत ।** **8 × 1 = 8**

1. 'इन्दुः' अस्य पर्यायपदम् इदं भवति ।

   (A) चन्द्रः (B) सूर्यः

   (C) गुरुः (D) शुक्रः

2. 'अर्जुनस्य' अत्र इदं लिङ्गं भवति ।

   (A) स्त्रीलिङ्गम् (B) पुल्लिङ्गम्

   (C) नपुंसकलिङ्गम् (D) त्रिलिङ्गम्

3. 'नूतनम्' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) नवीनम् (B) विनूतनम्

   (C) पुरातनम् (D) अवनतम्

4. 'गच्छ' अत्र एषः लकारः भवति ।

   (A) लट् लकारः (B) लृट् लकारः

   (C) लिट् लकारः (D) लोट् लकारः

5. 'अभवत्' अत्र एषः पुरुषः वर्तते ।

   (A) प्रथमपुरुषः (B) उत्तमपुरुषः

   (C) अन्यपुरुषः (D) मध्यमपुरुषः

www.careerindia.com

CAREERINDIA



6. 'अस्मदीयः' अत्र विवरणम् एवं भवति ।

(A) युष्माकम् अयम् (B) अस्माकम् अयम्

(C) भवताम् अयम् (D) रूपस्य अयम्

7. 'जनकः धनं ददाति' । अत्र रेखाङ्कितपदस्य कारकम् इदं भवति ।

(A) कर्मकारकम् (B) सम्प्रदानकारकम्

(C) कर्तृकारकम् (D) अधिकरणकारकम्

8. ''शिवेन लोकः रक्षितः ।'' अत्र कृदन्तपदम् इदं भवति ।

(A) इति (B) शिवेन

(C) लोकः (D) रक्षितः

**II. चतुर्थं पदं लिखत । 4 × 1 = 4**

9. जानकी — सीता :: दाशरथिः — .................... ।

10. महत्तरा — भिक्षा :: अङ्गराजः — .................... ।

11. अशनम् — आहारः :: परम्परा — .................... ।

12. विवेकानन्दः — गुरुः :: अखण्डानन्दः — .................... ।

**III. एकवाक्येन उत्तरं लिखत । 4 × 1 = 4**

13. पठनार्थं का आवश्यकी ?

14. सीतां कः अपहृतवान् ?

15. किं किं शाश्वतं तिष्ठति ?

16. भिन्नौ कौ ?

www.careerindia.com

CAREERINDIA



**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

17. मेलुकोटे क्षेत्रस्य नामान्तराणि कानि ?

18. रामः सीतां विना कथं वसति ?

19. कर्मणः विषये भगवतः अभिप्रायः कः ?

20. रघुवंशीयराजाः कथम् आसन् ?

**अथवा**

शारदा कीदृशी ?

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

21. ಆನೆಯು ಸಸ್ಯಾಹಾರಿ ಪ್ರಾಣಿ. ಅದು ಕಾಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತದೆ.

Elephant is a herbivores animal. It lives in the forest.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

22. कृषकाः ग्रामे निवसन्ति । ते क्षेत्रेषु श्रमेण कार्यं कुर्वन्ति ।

**VII.** 23. **विग्रहवाक्यं लिखत ।** **1 × 2 = 2**

a) प्रतिदिनम् ।

b) प्राप्तानन्दः ।

**अथवा**

www.careerindia.com

CAREERINDIA



**समस्तपदं लिखत ।**

a) चक्रं पाणौ यस्य सः = ..................

b) क्षणं क्षणम् = ......................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 × 2 = 2**

24. सर्वदो माधवः पायात् ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 × 3 = 6**

25. ''जित्वा पृथिवीं ददामि ।''

कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. ''भवतः का गतिः भवेत् ?''

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**X.** 27. **सन्धिं विभज्य नाम लिखत ।** **1 × 3 = 3**

a) ज्योतिर्गमय ।

b) पत्रालयः ।

c) बालो गच्छति ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

28. सीतां विचेतुं पथि चारणानाम् ।

www.careerindia.com

CAREERINDIA



**XII. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **1 × 3 = 3**

29. कालिदासः ।

**अथवा**

भोजराजः ।

**XIII. पद्यपाठस्य नाम विलिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

30. चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।

31. शीलं शौर्यमनालस्यं पाण्डित्यं मित्रसङ्ग्रहः ।
अचोरहरणीयानि पञ्चैतान्यक्षयो निधिः ।।

32. भाषा भिन्ना वेषो भिन्नः
नीतिर्भिन्ना नियमो भिन्नः ।
भिन्ना जातिः भिन्नश्च कुलम्
भिन्नावेव हि मतधर्मौ ।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 × 3 = 3**

33. तमोघ्नाय ........................................................................

........................................................................ पतये नमः ।।

www.careerindia.com

CAREERINDIA



**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत ।** **2 × 4 = 8**

34. अपूर्वमेलापाठे वर्णितस्य संस्कृतग्रामस्य वैशिष्ट्यं वर्णयत ।

35. 'विक्रमः वेतालश्च' इति पाठस्य सारांशं सङ्गृह्य लिखत ।

**अथवा**

'उभयभारती भारतस्य आदर्शनारी' इति विषयं सङ्गृह्य लिखत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

36. भरतखण्डस्य उत्तरदिशि हिमालयः अस्ति । सः नगाधिराजः इति विख्यातः वर्तते । भारतीयानां हृदये हिमालयस्य महत्त्वपूर्णं स्थानं विद्यते । वेदपुराणेषु च अस्य माहात्म्यं वर्णितम् । अयं शैलः विश्वस्मिन् एव अनुपमः ।

**प्रश्नाः**

i) कस्यां दिशि हिमालयः अस्ति ?

ii) कः नगाधिराजः इति विख्यातः ?

iii) भारतीयानां हृदये हिमालयस्य कीदृशं स्थानं विद्यते ?

iv) हिमालयस्य माहात्म्यं केषु वर्णितम् ?

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 4 = 4**

37. परिसरमालिन्यम् ।

**अथवा**

संस्कृतभाषायाः गरिमा ।

[ Turn over

www.careerindia.com

CAREERINDIA



**XVIII. पत्रं लिखत ।** **1 × 5 = 5**

38. धारवाडमण्डलस्य सर्वकारीयविद्यालयस्यः छात्रः/छात्रा इति मत्वा दिनद्वयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति पत्रं लिखत ।

**अथवा**

तुमकूरुमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा अध्ययनविषये हासननगरे वर्तमानं मित्रं प्रति पत्रं लिखत ।

www.careerindia.com